# संस्कृत वार्ता:

दिनाङ्क : 23/04/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- तमिलनाडुराज्ये विधानसभानिर्वाचनाय पश्चिमबंगाले च प्रथमचरणाय मतदानं प्रचलति । आपराह्नं यावत् तमिलनाडुराज्ये मतदानं द्वयशीति-प्रतिशन्मितं , पश्चिमबङ्गाले च द्विषष्टि-प्रतिशन्मितं यावत् संसूचितम् ।
- उत्तराखण्डस्य टिहरी-मण्डले अद्य चम्बा-कोटि-नैल-पथि एकस्यां वाहन-दुर्घटनायां अष्ट जनाः मृताः ।
- सेंट्रल बोर्ड ऑफ़ सेकेंडरी एजुकेशन (CBSE) इत्यनेन संस्थानेन मईमासस्य पञ्चदशदिनाङ्के दशमकक्षायाः द्वितीयचरणस्य परीक्षा आयोक्ष्यते ।
- भारतीय-ऋतु-विभागेन आगामिषु द्विदिवसेषु दिल्ली-छत्तीसगढ-हरियाणा-चण्डीगढ-मध्यप्रदेश-पञ्जाब-राजस्थान-उत्तरप्रदेश-विदर्भ-क्षेत्रेषु 'उष्णतरंगस्य पूर्वानुमानं प्रख्यापितम्।

-----------------------------------------------

<u>विधानसभा-निर्वाचनम्</u>

तमिलनाडुराज्ये विधानसभानिर्वाचनाय पश्चिमबंगाले च प्रथमचरणाय मतदानं प्रचलति। आपराह्नं यावत् तमिलनाडुराज्ये मतदानं द्वयशीति-प्रतिशन्मितं , पश्चिमबङ्गाले च द्विषष्टि-प्रतिशन्मितं यावत् संसूचितम्। तमिलनाडुराज्ये चतुस्त्रिंशदुत्तर-द्विशत-निर्वाचनासनेषु पश्चिम-बंगालस्य द्वापञ्चाशदुत्तरैकशतं निर्वाचनासनेषु मतदानं प्रातः सप्तवादने आरब्धवान् । मतानां गणना मईमासस्य चतुर्थे दिनाङ्के भविष्यति ।

-----------------------------------------------

## उत्तराखण्ड-वाहन-दुर्घटना

उत्तराखण्डस्य टिहरी-मण्डले अद्य चम्बा-कोटि-नैल-पथि एकस्यां वाहन-दुर्घटनायां अष्ट जनाः मृताः, त्रयः च व्रणिताः अभवन्। इयं दुर्घटना चम्बा-आरक्षक-स्थानस्य क्षेत्रे घटिता। आरक्षकाः 'एस.डी.आर.एफ.' इति दलं च त्वरितमेव घटनास्थलं सम्प्राप्य आपत् उद्धार कार्यम् आरब्धवन्तः। मुख्यमन्त्री पुष्करसिंहधामी दुर्घटनामभिलक्ष्य दुःखं प्रकटितवान् सहैव योग्यं उपचारं सुनिश्चेतुं परामृष्टवान्।

-----------------------------------------------

## पश्चिम-एशिया

प्रशासनेन अद्य प्रोदीरितं यत् पश्चिम-एशिया-खण्डे सङ्कटावधौ नागरिकाणां कृते असुविधा न भवेत् इति सुनिश्चेतुम् आवश्यकाः पदक्षेपाः विधीयन्ते। प्रशासनेन दृढतया प्रतिपादितं यत् अत्यावश्यकानां सामग्रीणां कृते भारतीयनागरिकाः प्रभाविताः न सन्ति। अन्तः मन्त्रालय-विवरण-सभायां पेट्रोलियम-सचिवा सुजाता शर्मा सूचितवती यत् देशे 'एल.पी.जी.' पर्याप्तमात्रायामस्ति , यत्र बुधवासरे प्रायः द्वादश लक्षं यावत् अनिलकोषाः प्रेषिताः । सा अवोचत् यत् प्रायः चतुः नवतिः प्रतिशतं आपूर्तिः 'डिलीवरी ऑथेंटिकेशन कोड' डी ए सी इति माध्यमेन पूर्णा भवति, तावत् वाणिज्यिक-एल.पी.जी.-आपूर्तिः सप्ततिः प्रतिशतं वर्तते।

नौवहन-मन्त्रालयस्य अधिकारी मुकेश-मङ्गलः अवदत् यत् विदेशीय-पोतेषु आक्रमण-घटनासु अपि किमपि भारतीयं जलयानं लक्ष्यं न कृतम्, सर्वे भारतीयाः समुद्रीय-उद्यमिनः च सुरक्षिताः सन्ति। विदेश-मन्त्रालयस्य अधिकारी असीम आर. महाजनः उक्तवान् यत् प्रशासनं सूक्ष्म-निरीक्षणं कुर्वत् अस्ति, नियन्त्रण-कक्षाः सक्रियाः सन्ति सहैव दूतावासाः साहाय्यार्थं समन्वयम् कुर्वन्तः सन्ति। सः सूचितवान् यत् फरवरी मासस्य अष्टाविंशतिः दिनाङ्कतात् अधुना यावत् द्वादश लक्षतः अधिकाः यात्रिणः अस्मात् क्षेत्रात् भारतं प्रत्यागताः।

-----------------------------------------------

## CBSE -द्वितीयचरणपरीक्षा

सेंट्रल बोर्ड ऑफ़ सेकेंडरी एजुकेशन (CBSE) इत्यनेन संस्थानेन मईमासस्य पञ्चदशदिनाङ्के दशमकक्षायाः द्वितीयचरणस्य परीक्षा आयोक्ष्यते। एषा परीक्षा वैकल्पिकी वर्तते। उत्तीर्णाः छात्राः विज्ञान-गणित-सामाजिक-विज्ञान-भाषाणां केषुचित् त्रिषु विषयेष्वेव स्वकीयं प्रदर्शनम् संशोधयितुं अनुमताः भविष्यन्ति। संस्थानेन अस्य मासस्य पञ्चदशदिनाङ्के दशमकक्षायै प्रथम-मुख्यपरीक्षायाः परिणामा समुद्घोषिताः। एषः पदक्षेपः राष्ट्रिय-शिक्षा-नीति -विंशति-विंशति इत्यस्यानुरूपं वर्तते, यस्मिन् शैक्षणिकसत्रे एव छात्रेभ्यः द्वितीयावसरं प्रदाय परीक्षया सम्पृक्तम् अवसादं दूरीकर्तुं कृतप्रयासः समर्थ्यते।

---------------------------------------------------

## बदरीनाथ-धाम

उत्तराखण्डस्य चमोली-मण्डले स्थितस्य बदरीनाथ-मन्दिरस्य द्वाराणि अद्य प्रातःकाले वैदिक-मन्त्रोद्घोषैः पारम्परिक-विधिभिः च सह भक्तानां कृते उद्घाटितानि। अस्मदीय वार्ताहरस्य विवरणानुसारं, मुख्यमन्त्री पुष्करसिंहधामी प्रधानमन्त्रिणः नरेन्द्रमोदिनः नाम्ना 'महाभिषेक-पूजनम्' अकरोत्। असौ राष्ट्रस्य राज्यस्य च समृद्धये मंगलमयं प्रार्थनामकरोत्। मुख्यमन्त्रिणा तीर्थयात्रायाः व्यवस्थानां समीक्षा अपि अकारि सहैव प्रोक्तं यत् 'चतुर्धाम-यात्रा' सुरक्षिता सुगमा च भवेत् इति सुनिश्चितं कर्तुं सर्वैरपि कार्यं क्रियन्ते।

---------------------------------------------------

## प्रधानमन्त्री-रेल

प्रधानमन्त्री नरेंद्रमोदी अकथयत् यत् रेलमार्गाणाम् आधुनिकीकरणेन एकः तीव्रः विश्वासात्मकः च रेलमार्गसम्पर्कः द्रुतगत्या अग्रे वर्धते। एकस्मिन् सञ्जालीयसंदेशे , एकस्मिन् आङ्ग्लदैनिकपत्रे रेलमंत्रिणा अश्विनीवैष्णवेन लिखितम् एकं लेखं पुनः प्रकाशयन्, श्रीमोदी प्रोक्तवान् यत् रेलमार्गाणां नवीनीकरणेन, उन्नतपरीक्षणेन , उन्नतप्रबन्धनेन च यात्रा-गुणवत्ता उत्तमा जाता अपि च रेलयानानाम् उच्चगतिरपि सुनिश्चिता । तेन पुनः कथितं यत् एतैः परिवर्तनैः यात्रासमयः न्यूनः कृतः अस्ति सहैव यात्रा सुगमा सरला च सञ्जाता।

-----------------------------------------------

## जीवाश्मतैल-मंत्रालय

जीवाश्मतैल-प्राकृतिक-वात्येधन-मंत्रालयः त◌ासां सूचनानां खंडनम् अकरोत् य◌ासु जीवाश्मतैलस्य मूल्ये सम्भावितवृद्ध्याः परामर्शः प्रदत्तः आसीत्। मंत्रालयः स्पष्टीकृतवान् यत् सर्वकारस्य पार्श्वे एतादृशः कः अपि प्रस्तावः न अस्ति। मन्त्रालयः प्रोक्तवान् यत् एतादृशानां सूचनानाम् उद्देश्यं नागरिकेषु भयोत्पादनम् अस्ति सहैव मन्त्रालयेन एताः सूचनाः भ्रामकपूर्णाः प्रोक्ताः। मंत्रालयः सबलम् अकथयत् यत् भारतम् एव सः देशः अस्ति यत्र विगतेषु चतुर्षु वर्षेषु जीवाश्म-शिलातैलयोः मूल्यानि न वर्धितानि। मन्त्रालयेन प्रोक्तं यत् केंद्र-सर्वकारः तैलवितरकानि संस्थानानि च अन्तराष्ट्रियतैलमूल्येषु भीषणवृद्ध्यानन्तरम् अपि नागरिकेभ्यः सौकर्यं प्रदातुं निरन्तरं पदक्षेपान् समुत्थापयन्।

-----------------------------------------------

## भारत-फ्रांस्

भारतेन फ्रांसस्य सः निर्णयः प्रशंसितः यस्मिन् भारतीय-नागरिकेभ्यः आव्रजनानुमतिपत्र-मुक्त-यात्रायाः सुविधा समारब्धा। एषः निर्णयः फ़रवरी-मासे मुम्बय्यां विहितस्य मेलनस्य अवधौ प्रधानमन्त्रिणा नरेंद्रमोदिना राष्ट्रपतिना इमैनुएल-मैक्रॉन इत्यनेन मध्ये जातायाः परस्परसन्ध्याः अनन्तरं स्वीकृतः अस्ति। विदेश-मंत्रालयः अकथयत् यत् अप्रैलमासस्य दशदिनाङ्कात् फ्रांसदेशस्य यात्रां कुर्वद्भ्यः भारतीयनागरिकेभ्यः अधुना आव्रजनपत्रकस्य आवश्यकता न वर्तते। मन्त्रालयेन एषः पदक्षेपः भारत-फ्रांसयोः मध्ये सुदृढ-रणनीति-सहयोगत्वेन प्रतिपादितः अस्ति सहैव अनेन द्वयोर्देशयोर्मध्ये सुगमयात्रया सह पारस्परिकसम्बन्धाः अपि सुदृढाः भविष्यन्ति।

-----------------------------------------------

## भारत-अफ्रीका-शिखरसम्मेलनम्:

विदेशमन्त्री डॉ. एस. जयशङ्करः अवोचत् यत् यदा विश्वं कठिनं भू-राजनैतिक-समाह्वानं सम्मुखीकरोति, तदा भारत-अफ्रीका-संधिः विशेषं महत्त्वम् आवहति। सः न्यगादीत् यत् अद्य भारतस्य विदेशनीतौ अफ्रीका-महाद्वीपः केन्द्रस्थानं भजते , सहैव भारतेन गतवर्षेषु अफ्रीका-

खण्डे स्वस्य कूटनीतिक-प्रभावो विस्तारितः। विदेशमन्त्री अद्य नवदिल्ल्यां 'भारत-अफ्रीका-मञ्च-शिखरसम्मेलनस्य' पूर्वावलोकन-कार्यक्रमे अस्य 'लोगो' इति चिह्नस्य, विषयस्य अथ च जालपुटस्यानावरणं कुर्वन् एतत् प्रतिपादितवान्।

शिखरसम्मेलनमिदम् आगामि-मासस्य अष्टाविंशतिः दिनाङ्कात् एकत्रिंशत् दिनाङ्कपर्यन्तं आयोक्ष्यते।

---------------------------------------------------

**<u>ऋतु-विज्ञान-विभाग</u>ः**

भारतीय-ऋतु-विभागेन आगामिषु द्विदिवसेषु दिल्ली-छत्तीसगढ-हरियाणा-चण्डीगढ-मध्यप्रदेश-पञ्जाब-राजस्थान-उत्तरप्रदेश-विदर्भ-क्षेत्रेषु 'उष्णतरंगस्य पूर्वानुमानं प्रख्यापितम्।

---------------------------------------------------

**<u>आईपीएल्-क्रिकेट:</u>**

आईपीएल्- इति क्रिकेटक्रीडायां, मुंबई-इंडियंस्-दलम् अद्य सायं मुम्बय्याः वानखेडे-स्टेडियम् इति क्रीडाङ्गणे चेन्नई-सुपर-किंग्स-दलं सम्मुखीकरिष्यति। क्रीडास्पर्धा एषा सायं सार्धसप्तवादने भविष्यति। अवधेयं यत् ह्यः रात्रौ , राजस्थान-रॉयल्स-दलेन लखनऊनगरे लखनऊ-सुपर-जायंट्स-दलं चत्वारिंशत्-धावनाङ्कैः पराजितम्। षष्ट्यधिकैकशतं धावनाङ्कान् अनुसरत् लखनऊ-सुपर-जायन्ट्स्-दलम् अष्टादश-कन्दुक-क्षेपण-चक्रेषु केवलं नवदशाधिकैकशतं धावनाङ्कान् एव समर्जयत्।

**।। इति वार्ता: ।।**